योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०२५

श्रीवसिष्ठ उवाच ।

नभःस्थलाद्गिरिग्रामं गच्छन्त्यौ कंचिदेव ते ।

ज्ञप्तिचित्तस्थितं भूमितलं ददृशतुः स्त्रियौ ।। १

ब्रह्माण्डनरहृत्पद्मं दिगष्टकदलं बृहत् ।

गिरिकेसरसंबाधं स्वामोदभरसुन्दरम् ।। २

सरित्केसरिकानालमध्येऽवश्यायबिन्दुकम् ।

शर्वरिभ्रमरीभ्रान्तं भूतौघमशकाकुलम् ।। ३

अन्तर्गुणगणाकीर्णं सुरन्ध्रैः सुषिरैर्वृतम् ।

उह्यमानपयःपूरैर्दिवसालोककान्तिमत् ।। ४

रसार्द्रं खे भ्रमद्ध्वंसं रात्रिसंकोचभाजनम् ।

पातालपङ्कनिर्मग्ननागनाथमृणालकम् ।। ५

कदाचिदास्पदाम्भोधिकम्पकम्पितदिग्दलम् ।

अधोनालगतानन्तदैत्यदानवकण्टकम् ।। ६

असुरस्त्रैणवल्लर्या संभोगसुकुमारया ।

प्राप्यभूभृन्महाबीजहृदयं भूतबीजया ।।

जम्बूद्वीप इति ख्यातां विपुलां तत्र कर्णिकाम् ।

सरित्केसरिकानाला नगरग्रामकेसराम् ।। ८

कुलशैलेश्वरोत्तुङ्गबीजसप्तकसुन्दरीम् ।

मध्यस्थोच्चमहामेरुबीजाक्रान्तनभस्थलीम् ।। ९

सरःप्रालेयकणिकां वनजङ्गलधूलिकाम् ।

स्थलेष्वामण्डलान्तस्थजनजालालिमण्डलाम् ।। १०

तां योजनशताकारैः प्रतिराकं प्रबोधिभिः ।

सागरैर्भ्रमरैर्व्याप्ता दिक्वतुष्टयशालिभिः ।। ११

दिग्दलाष्टकविश्रान्तससुराम्भोधिषट्पदाम् ।

भ्रातृभिर्नवभिर्भूपैर्नवधा परिकल्पिताम् ।। १२

लक्षयोजनविस्तीर्णामाकीर्णां च रजोलवैः ।

नानाजनपदव्यूहस्थिरावश्यायसीकराम् ।। १३

द्वीपात्तु द्विगुणं मानं लवणार्णवलेखया ।

दधत्या वलितां बाह्ये प्रकोष्ठमिव कम्बुना ।। १४

ततोऽपि द्विगुणं देहं दधत्या वलयाकृतिम् ।

जगद्भूतलताव्याप्तां शाकाख्यद्वीपलेखया ।। १ ऽ

ततोऽपि द्विगुणाकारं धारयन्त्या च वेष्टिताम् ।

प्रत्यग्रक्षीरपूर्णाब्धिलेखया स्वादुशीतया ।। १६

ततोऽपि द्विगुणाकारं धारयन्त्योपवेष्टिताम् ।

नानाजनालंकृतया कुशाख्यद्वीपलेखया ।। १७

ततोऽपि द्विगुणाकारं धारयन्त्या च वेष्टिताम् ।

दध्यब्धिलेखया नित्यसंतर्पितसुरौघया ।। १८

ततः क्रौञ्चाभिधद्वीपलेखयैवं प्रमाणया ।

वेष्टितां खातरचया नवां नृपपुरीमिव ।। १९

ततोऽपि च घृताम्भोधिलेखयैवं प्रमाणया ।

ततोऽपि शाल्मलीद्वीपलेखया मलपूर्णया ।। २०

ततः सुरामहाम्भोधिलेखया पुष्पशुभ्रया ।

शेषस्य देहलतया हरिमूर्तिमिवावृताम् ।। २१

ततो गोमेदकद्वीपलेखयैवप्रमाणया ।

इक्ष्वब्धिलेखयाप्येवं हिमवत्सानुशुद्धया ।।

ततोऽपि पुष्करद्वीपलेखया द्विगुणस्थया ।

अन्ते स्वादूदकाम्भोधिलेखयैवं प्रमाणया ।। २३

ततो दशगुणेनाथ पातालतलगामिना ।

निखातवलयेनोच्चैः श्वभ्रसंभाररूपिणा ।। २४

पातालगामिमार्गेण वलितां भयदात्मना ।

एतस्मात्खलु सर्वस्मात्ततो दशगुणोच्चया ।। २५

आव्योमसु चतुर्दिक्षु श्वभ्रसंभारभीषया ।

अर्धोन्म्लानतमोरूपलग्ननीलोत्पलस्रजा ।। २६

नानामाणिक्यशिखरकह्लारकुमुदाब्जया ।

लोकालोकाचलोत्तालविपुलोद्दाममालया ।। २७

वलितां त्रिजगल्लक्ष्मीधम्मिल्लवलनामिव ।।

एतस्मादेव सर्वस्मात्ततो दशगुणात्मना ।। २८

अज्ञातभूतसंचारनाम्नारण्येन मालिताम् ।

एतस्मादेव सर्वस्मात्ततो दशगुणात्मना ।। २९

नभसेव चतुर्दिक्कं व्याप्तामतुलवारिणा ।

एतस्मादेव सर्वस्मात्ततो दशगुणात्मना ।। ३०

मेर्वादिद्रावणोत्केन ज्वालाजालेन मालिताम् ।

एतस्मादथ सर्वस्मात्ततो दशगुणात्मना ।। ३१

मेर्वाद्यचलसङ्घातं नयता तृणपांसुवत् ।

वहताद्रीन्द्रविस्फोटकारिणा जवहारिणा ।। ३२

निःशून्यत्वादशब्देन मरुता परितो वृतम् ।

एतस्मादथ सर्वस्मात्ततो दशगुणात्मना ।। ३३

परितो वलितं व्योम्ना निःशून्येनैकरूपिणा ।

अथ योजनकोटीनां शतेन घनरूणिणा ।

व्याप्तं ब्रह्माण्डकुड्येन हैमेनापि द्विपर्वणा ।। ३४

इति जलधिमहाद्रिलोकपालत्रिदशपुराम्बरभूतलैः परीतम् ।

जगदुदरमवेक्ष्य मानुषी द्राग्भुवि निजमन्दिरकोटरं ददर्श ।। ३५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलो० भूलोकवर्णनं नाम पञ्चविंशः सर्गः ।। २५ ।।